# Shri Gangasahasranama Stotram

# શ્રીગઙ્ગાસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : Gangasahasranamastotram from Skandapurana

File name : gangaasahasra.itx

Category : sahasranAma, devii, nadI, stotra, devI

Location : doc_devii

Transliterated by : DPD, Kirk Wortman

Proofread by : DPD, Kirk Wortman

Description-comments : akArAdikShakArAnta

Source : Skandapurana, Kashikhanda

Latest update : August 13, 2001, February 11, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 22, 2022

*sanskritdocuments.org*

# શ્રીગઙ્ગાસહસ્રનામસ્તોત્રમ્

અકારાદિક્ષકારાન્ત નામઘટિતં સ્કન્દપુરાણાન્તર્ગતં

અગસ્ત્ય ઉવાચ
વિના સ્નાનેન ગઙ્ગાયાં નૃણાં જન્મ નિરર્થકમ્ ।
ઉપાયાન્તરમસ્ત્યન્યદ્ યેન સ્નાનફલં લભેત્ ॥ ૧॥

અશક્તાનાં ચ પઙ્ગૂનામાલસ્યોપહતાત્મનામ્ ।
દૂરદેશાન્તરસ્થાનાં ગઙ્ગાસ્નાનં કથં ભવેત્ ॥ ૨॥

દાનં વાથ વ્રતં વાથ મન્ત્રઃ સ્તોત્રં જપોઽથવા ।
તીર્થાન્તરાભિષેકો વા દેવતોપાસનં તુ વા ॥ ૩॥

યદ્યસ્તિ કિઞ્ચિત્ ષડ્વક્ત્ર ગઙ્ગાસ્નાનફલપ્રદમ્ ।
વિધાનાન્તરમાત્રેણ તદ્ વદ પ્રણતાય મે ॥ ૪॥

ત્વત્તો ન વેદ સ્કન્દાન્યો ગઙ્ગાગર્ભસમુદ્ભવ ।
પરં સ્વર્ગતરઙ્ગિણ્યાં મહિમાનં મહામતે ॥ ૫॥

સ્કન્દ ઉવાચ
સન્તિ પુણ્યજલાનીહ સરાંસિ સરિતો મુને ।
સ્થાને સ્થાને ચ તીર્થાનિ જિતાત્માધ્યુષિતાનિ ચ ॥ ૬॥

દૃષ્ટપ્રત્યયકારીણિ મહામહિમભાઞ્જ્યપિ ।
પરં સ્વર્ગતરઙ્ગિણ્યાઃ કોટ્યંશોઽપિ ન તત્ર વૈ ॥ ૭॥

અનેનૈવાનુમાનેન બુદ્ધ્યસ્વ કલશોદ્ભવ ।
દધ્રે ગઙ્ગોત્તમાઙ્ગેન દેવદેવેન શમ્ભુના ॥ ૮॥

સ્નાનકાલેઽન્યતીર્થેષુ જપ્યતે જાહ્નવી જનૈઃ ।
વિના વિષ્ણુપદીં ક્વાન્યત્ સમર્થમઘમોચને ॥ ૯॥

ગઙ્ગાસ્નાનફલં બ્રહ્મન્ ગઙ્ગાયામેવ લભ્યતે ।

યથા દ્રાક્ષાફલસ્વાદો દ્રાક્ષાયામેવ નાન્યતઃ ॥ ૧૦॥

અસ્ત્યુપાય ઇહ ત્વેકઃ સ્યાદ્ યેનાવિકલં ફલમ્ ।
સ્નાનસ્ય દેવસરિતો મહાગુહ્યતમો મુને ॥ ૧૧॥

શિવભક્તાય શાન્તાય વિષ્ણુભક્તિપરાય ચ ।
શ્રદ્ધાલવે ત્વાસ્તિકાય ગર્ભવાસમુમુક્ષવે ॥ ૧૨॥

કથનીયં ન ચાન્યસ્ય કસ્યચિત્ કેનચિત્ ક્વચિત્ ।
ઇદં રહસ્યં પરમં મહાપાતકનાશનમ્ ॥ ૧૩॥

મહાશ્રેયસ્કરં પુણ્યં મનોરથકરં પરમ્ ।
દ્યુનદીપ્રીતિજનકં શિવસન્તોષસન્તતિઃ ॥ ૧૪॥

નામ્નાં સહસ્રં ગઙ્ગાયાઃ સ્તવરાજેષુ શોભનમ્ ।
જપ્યાનાં પરમં જપ્યં વેદોપનિષદાં સમમ્ ॥ ૧૫॥

જપનીયં પ્રયત્નેન મૌનિના વાચકં વિના ।
શુચિસ્થાનેષુ શુચિના સુસ્પષ્ટાક્ષરમેવ ચ ॥ ૧૬॥

ધ્યાનમ્ -
શૈલેન્દ્રાદવતારિણી નિજજલે મજ્જજ્જનોત્તારિણી
પારાવારવિહારિણી ભવભયશ્રેણી સમુત્સારિણી ।
શેષાહેરનુકારિણી હરશિરોવલ્લીદલાકારિણી
કાશીપ્રાન્તવિહારિણી વિજયતે ગઙ્ગા મનોહારિણી ॥

ૐ નમો ગઙ્ગાદેવ્યૈ ॥

ઓંકારરૂપિણ્યજરાઽતુલાઽનન્તાઽમૃતસ્રવા ।
અત્યુદારાઽભયાઽશોકાઽલકનન્દાઽમૃતાઽમલા ॥ ૧૭॥

અનાથવત્સલાઽમોઘાઽપાંયોનિરમૃતપ્રદા ।
અવ્યક્તલક્ષણાઽક્ષોભ્યાઽનવચ્છિન્નાઽપરાઽજિતા ॥ ૧૮॥

અનાથનાથાઽભીષ્ટાર્થસિદ્ધિદાઽનઙ્ગવર્ધિની ।
અણિમાદિગુણાઽધારાઽગ્રગણ્યાઽલીકહારિણી ॥ ૧૯॥

અચિન્ત્યશક્તિરનઘાઽદ્ભુતરૂપાઽઘહારિણી ।
અદ્રિરાજસુતાઽષ્ટાઙ્ગયોગસિદ્ધિપ્રદાઽચ્યુતા ॥ ૨૦॥

અક્ષુણ્ણશક્તિરસુદાઽનન્તતીર્થાઽમૃતોદકા ।

અનન્તમહિમાઽપારાઽનન્તસૌખ્યપ્રદાઽન્નદા ॥ ૨૧॥

અશેષદેવતામૂર્તિરઘોરાઽમૃતરૂપિણી ।
અવિદ્યાજાલશમની હ્યપ્રતર્ક્યગતિપ્રદા ॥ ૨૨॥

અશેષવિઘ્નસંહર્ત્રી ત્વશેષગુણગુમ્ફિતા ।
અજ્ઞાનતિમિરજ્યોતિરનુગ્રહપરાયણા ॥ ૨૩॥

અભિરામાઽનવદ્યાઙ્ગ્યનન્તસારાઽકલઙ્કિની ।
આરોગ્યદાઽઽનન્દવલ્લી ત્વાપન્નાર્તિવિનાશિની ॥ ૨૪॥

આશ્ચર્યમૂર્તિરાયુષ્યા હ્યાઢ્યાઽઽદ્યાઽઽપ્રાઽઽર્યસેવિતા ।
આપ્યાયિન્યાપ્તવિદ્યાખ્યા ત્વાનન્દાઽઽશ્વાસદાયિની ॥ ૨૫॥

આલસ્યઘ્ન્યાપદાં હન્ત્રી હ્યાનન્દામૃતવર્ષિણી ।
ઇરાવતીષ્ટદાત્રીષ્ટા ત્વિષ્ટાપૂર્તફલપ્રદા ॥ ૨૬॥

ઇતિહાસશ્રુતીડ્યાર્થા ત્વિહામુત્રશુભપ્રદા ।
ઇજ્યાશીલસમિજ્યેષ્ઠા ત્વિન્દ્રાદિપરિવન્દિતા ॥ ૨૭॥

ઇલાલઙ્કારમાલેદ્ધા ત્વિન્દિરારમ્યમન્દિરા ।
ઇદિન્દિરાદિસંસેવ્યા ત્વીશ્વરીશ્વરવલ્લભા ॥ ૨૮॥

ઈતિભીતિહરેડ્યા ચ ત્વીડનીયચરિત્રભૃત્ ।
ઉત્કૃષ્ટશક્તિરુત્કૃષ્ટોડુપમણ્ડલચારિણી ॥ ૨૯॥

ઉદિતામ્બરમાર્ગોસ્રોરગલોકવિહારિણી ।
ઉક્ષોર્વરોત્પલોત્કુમ્ભા ઉપેન્દ્રચરણદ્રવા ॥ ૩૦॥

ઉદન્વત્પૂર્તિહેતુશ્ચોદારોત્સાહપ્રવર્ધિની ।
ઉદ્વેગઘ્ન્યુષ્ણશમની હ્યુષ્ણરશ્મિસુતાપ્રિયા ॥ ૩૧॥

ઉત્પત્તિસ્થિતિસંહારકારિણ્યુપરિચારિણી ।
ઊર્જં વહન્ત્યૂર્જધરોર્જાવતી ચોર્મિમાલિની ॥ ૩૨॥

ઊર્ધ્વરેતઃપ્રિયોર્ધ્વાધ્વા હ્યૂર્મિલોર્ધ્વગતિપ્રદા ।
ઋષિવૃન્દસ્તુતર્દ્ધિશ્ચ ઋણત્રયવિનાશિની ॥ ૩૩॥

ઋતમ્ભરર્દ્ધિદાત્રી ચ ઋક્સ્વરૂપા ઋજુપ્રિયા ।
ઋક્ષમાર્ગવહર્ક્ષાર્ચિરૃજુમાર્ગપ્રદર્શિની ॥ ૩૪॥

એધિતાખિલધર્માર્થા ત્વેકૈકામૃતદાયિની ।
એધનીયસ્વભાવૈજ્યા ત્વેજિતાશેષપાતકા ॥ ૩૫॥

ઐશ્વર્યદૈશ્વર્યરૂપા હ્યૈતિહ્યં હ્યૈન્દવીદ્યુતિઃ ।
ઓજસ્વિન્યોષધીક્ષેત્રમોજોદૌદનદાયિની ॥ ૩૬॥

ઓષ્ઠામૃતૌન્નત્યદાત્રી ત્વૌષધં ભવરોગિણામ્ ।
ઔદાર્યચઞ્ચુરૌપેન્દ્રી ત્વૌગ્રી હ્યૌમેયરૂપિણી ॥ ૩૭॥

અમ્બરાધ્વવહામ્બષ્ઠામ્બરમાલામ્બુજેક્ષણા ।
અમ્બિકામ્બુમહાયોનિરન્ધોદાન્ધકહારિણી ॥ ૩૮॥

અંશુમાલા હ્યંશુમતી ત્વઙ્ગીકૃતષડાનના ।
અન્ધતામિસ્રહન્ત્ર્યન્ધુરઞ્જના હ્યઞ્જનાવતી ॥ ૩૯॥

કલ્યાણકારિણી કામ્યા કમલોત્પલગન્ધિની ।
કુમુદ્વતી કમલિની કાન્તિઃ કલ્પિતદાયિની ॥ ૪૦॥

કાઞ્ચનાક્ષી કામધેનુઃ કીર્તિકૃત્ ક્લેશનાશિની ।
ક્રતુશ્રેષ્ઠા ક્રતુફલા કર્મબન્ધવિભેદિની ॥ ૪૧॥

કમલાક્ષી ક્લમહરા કૃશાનુતપનદ્યુતિઃ ।
કરુણાર્દ્રા ચ કલ્યાણી કલિકલ્મષનાશિની ॥ ૪૨॥

કામરૂપા ક્રિયાશક્તિઃ કમલોત્પલમાલિની ।
કૂટસ્થા કરુણા કાન્તા કૂર્મયાના કલાવતી ॥ ૪૩॥

કમલા કલ્પલતિકા કાલી કલુષવૈરિણી ।
કમનીયજલા કમ્રા કપર્દિસુકપર્દગા ॥ ૪૪॥

કાલકૂટપ્રશમની કદમ્બકુસુમપ્રિયા ।
કાલિન્દી કેલિલલિતા કલકલ્લોલમાલિકા ॥ ૪૫॥

ક્રાન્તલોકત્રયા કણ્ડૂઃ કણ્ડૂતનયવત્સલા ।
ખડ્ગિની ખડ્ગધારાભા ખગા ખણ્ડેન્દુધારિણી ॥ ૪૬॥

ખેખેલગામિની ખસ્થા ખણ્ડેન્દુતિલકપ્રિયા ।
ખેચરી ખેચરીવન્દ્યા ખ્યાતિઃ ખ્યાતિપ્રદાયિની ॥ ૪૭॥

ખણ્ડિતપ્રણતાઘૌઘા ખલબુદ્ધિવિનાશિની ।
ખાતૈનઃ કન્દસન્દોહા ખડ્ગખટ્વાઙ્ગ ખેટિની ॥ ૪૮॥

ખરસન્તાપશમની ખનિઃ પીયૂષપાથસામ્ ।
ગઙ્ગા ગન્ધવતી ગૌરી ગન્ધર્વનગરપ્રિયા ॥ ૪૯॥

ગમ્ભીરાઙ્ગી ગુણમયી ગતાતઙ્કા ગતિપ્રિયા ।
ગણનાથામ્બિકા ગીતા ગદ્યપદ્યપરિષ્ટુતા ॥ ૫૦॥

ગાન્ધારી ગર્ભશમની ગતિભ્રષ્ટગતિપ્રદા ।
ગોમતી ગુહ્યવિદ્યા ગૌર્ગોપ્ત્રી ગગનગામિની ॥ ૫૧॥

ગોત્રપ્રવર્ધિની ગુણ્યા ગુણાતીતા ગુણાગ્રણીઃ ।
ગુહામ્બિકા ગિરિસુતા ગોવિન્દાઙ્ઘ્રિસમુદ્ભવા ॥ ૫૨॥

ગુણનીયચરિત્રા ચ ગાયત્રી ગિરિશપ્રિયા ।
ગૂઢરૂપા ગુણવતી ગુર્વી ગૌરવવર્ધિની ॥ ૫૩॥

ગ્રહપીડાહરા ગુન્દ્રા ગરઘ્ની ગાનવત્સલા ।
ઘર્મહન્ત્રી ઘૃતવતી ઘૃતતુષ્ટિપ્રદાયિની ॥ ૫૪॥

ઘણ્ટારવપ્રિયા ઘોરાઘૌઘવિધ્વંસકારિણી ।
ઘ્રાણતુષ્ટિકરી ઘોષા ઘનાનન્દા ઘનપ્રિયા ॥ ૫૫॥

ઘાતુકા ઘૂર્ણિતજલા ઘૃષ્ટપાતકસન્તતિઃ ।
ઘટકોટિપ્રપીતાપા ઘટિતાશેષમઙ્ગલા ॥ ૫૬॥

ઘૃણાવતી ઘૃણિનિધિર્ઘસ્મરા ઘૂકનાદિની ।
ઘુસૃણાપિઞ્જરતનુર્ઘર્ઘરા ઘર્ઘરસ્વના ॥ ૫૭॥

ચન્દ્રિકા ચન્દ્રકાન્તામ્બુશ્ચઞ્ચદાપા ચલદ્યુતિઃ ।
ચિન્મયી ચિતિરૂપા ચ ચન્દ્રાયુતશતાનના ॥ ૫૮॥

ચામ્પેયલોચના ચારુશ્ચાર્વઙ્ગી ચારુગામિની ।
ચાર્યા ચારિત્રનિલયા ચિત્રકૃચ્ચિત્રરૂપિણી ॥ ૫૯॥

ચમ્પૂશ્ચન્દનશુચ્યમ્બુશ્ચર્ચનીયા ચિરસ્થિરા ।
ચારુચમ્પકમાલાઢ્યા ચમિતાશેષદુષ્કૃતા ॥ ૬૦॥

ચિદાકાશવહા ચિન્ત્યા ચઞ્ચચ્ચામરવીજિતા ।
ચોરિતાશેષવૃજિના ચરિતાશેષમણ્ડલા ॥ ૬૧॥

છેદિતાખિલપાપૌઘા છદ્મઘ્ની છલહારિણી ।

છન્નત્રિવિષ્ટપતલા છોટિતાશેષબન્ધના ॥ ૬૨॥

છુરિતામૃતધારૌઘા છિન્નૈનાશ્છન્દગામિની ।
છત્રીકૃતમરાલૌઘા છટીકૃતનિજામૃતા ॥ ૬૩॥

જાહ્નવી જ્યા જગન્માતા જપ્યા જઙ્ઘાલવીચિકા ।
જયા જનાર્દનપ્રીતા જુષણીયા જગદ્ધિતા ॥ ૬૪॥

જીવનં જીવનપ્રાણા જગજ્જ્યેષ્ઠા જગન્મયી ।
જીવજીવાતુલતિકા જન્મિજન્મનિબર્હિણી ॥ ૬૫॥

જાડ્યવિધ્વંસનકરી જગદ્યોનિર્જલાવિલા ।
જગદાનન્દજનની જલજા જલજેક્ષણા ॥ ૬૬॥

જનલોચનપીયૂષા જટાતટવિહારિણી ।
જયન્તી જઞ્જપૂકઘ્ની જનિતજ્ઞાનવિગ્રહા ॥ ૬૭॥

ઝલ્લરીવાદ્યકુશલા ઝલજ્ઝાલજલાવૃતા ।
ઝિણ્ટીશવન્દ્યા ઝઙ્કારકારિણી ઝર્ઝરાવતી ॥ ૬૮॥

ટીકિતાશેષપાતાલા ટઙ્કિકૈનોઽદ્રિપાટને ।
ટઙ્કારનૃત્યત્કલ્લોલા ટીકનીયમહાતટા ॥ ૬૯॥

ડમ્બરપ્રવહા ડીનરાજહંસકુલાકુલા ।
ડમડ્ડુમરુહસ્તા ચ ડામરોક્તમહાણ્ડકા ॥ ૭૦॥

ઢૌકિતાશેષનિર્વાણા ઢક્કાનાદચલજ્જલા ।
ઢુણ્ઢિવિઘ્નેશજનની ઢણઢ્ઢુણિતપાતકા ॥ ૭૧॥

તર્પણી તીર્થતીર્થા ચ ત્રિપથા ત્રિદશેશ્વરી ।
ત્રિલોકગોપ્ત્રી તોયેશી ત્રૈલોક્યપરિવન્દિતા ॥ ૭૨॥

તાપત્રિતયસંહર્ત્રી તેજોબલવિવર્ધિની ।
ત્રિલક્ષ્યા તારણી તારા તારાપતિકરાર્ચિતા ॥ ૭૩॥

ત્રૈલોક્યપાવની પુણ્યા તુષ્ટિદા તુષ્ટિરૂપિણી ।
તૃષ્ણાચ્છેત્રી તીર્થમાતા ત્રિવિક્રમપદોદ્ભવા ॥ ૭૪॥

તપોમયી તપોરૂપા તપઃસ્તોમફલપ્રદા । var પદપ્રદા
ત્રૈલોક્યવ્યાપિની તૃપ્તિસ્તૃપ્તિકૃત્તત્ત્વરૂપિણી ॥ ૭૫॥

ત્રૈલોક્યસુન્દરી તુર્યા તુર્યાતીતફલપ્રદા ।
ત્રૈલોક્યલક્ષ્મીસ્ત્રિપદી તથ્યા તિમિરચન્દ્રિકા ॥ ૭૬॥

તેજોગર્ભા તપસ્સારા ત્રિપુરારિશિરોગૃહા ।
ત્રયીસ્વરૂપિણી તન્વી તપનાઙ્ગજભીતિનુત્ ॥ ૭૭॥

તરિસ્તરણિજામિત્રં તર્પિતાશેષપૂર્વજા ।
તુલાવિરહિતા તીવ્રપાપતૂલતનૂનપાત્ ॥ ૭૮॥

દારિદ્ર્યદમની દક્ષા દુષ્પ્રેક્ષા દિવ્યમણ્ડના ।
દીક્ષાવતી દુરાવાપ્યા દ્રાક્ષામધુરવારિભૃત્ ॥ ૭૯॥

દર્શિતાનેકકુતુકા દુષ્ટદુર્જયદુઃખહૃત્ ।
દૈન્યહૃદ્દુરિતઘ્ની ચ દાનવારિપદાબ્જજા ॥ ૮૦॥

દન્દશૂકવિષઘ્ની ચ દારિતાઘૌઘસન્તતિઃ ।
દ્રુતા દેવદ્રુમચ્છન્ના દુર્વારાઘવિઘાતિની ॥ ૮૧॥

દમગ્રાહ્યા દેવમાતા દેવલોકપ્રદર્શિની ।
દેવદેવપ્રિયા દેવી દિક્પાલપદદાયિની ॥ ૮૨॥

દીર્ઘાયુઃ કારિણી દીર્ઘા દોગ્ધ્રી દૂષણવર્જિતા ।
દુગ્ધામ્બુવાહિની દોહ્યા દિવ્યા દિવ્યગતિપ્રદા ॥ ૮૩॥

દ્યુનદી દીનશરણં દેહિદેહનિવારિણી ।
દ્રાઘીયસી દાઘહન્ત્રી દિતપાતકસન્તતિઃ ॥ ૮૪॥

દૂરદેશાન્તરચરી દુર્ગમા દેવવલ્લભા ।
દુર્વૃત્તઘ્ની દુર્વિગાહ્યા દયાધારા દયાવતી ॥ ૮૫॥

દુરાસદા દાનશીલા દ્રાવિણી દ્રુહિણસ્તુતા ।
દૈત્યદાનવસંશુદ્ધિકર્ત્રી દુર્બુદ્ધિહારિણી ॥ ૮૬॥

દાનસારા દયાસારા દ્યાવાભૂમિવિગાહિની ।
દૃષ્ટાદૃષ્ટફલપ્રાપ્તિર્દેવતાવૃન્દવન્દિતા ॥ ૮૭॥

દીર્ઘવ્રતા દીર્ઘદૃષ્ટિર્દીપ્તતોયા દુરાલભા ।
દણ્ડયિત્રી દણ્ડનીતિર્દુષ્ટદણ્ડધરાર્ચિતા ॥ ૮૮॥

દુરોદરઘ્ની દાવાર્ચિર્દ્રવદ્દ્રવ્યૈકશેવધિઃ ।
દીનસન્તાપશમની દાત્રી દવથુવૈરિણી ॥ ૮૯॥

દરીવિદારણપરા દાન્તા દાન્તજનપ્રિયા ।
દારિતાદ્રિતટા દુર્ગા દુર્ગારણ્યપ્રચારિણી ॥ ૯૦॥

ધર્મદ્રવા ધર્મધુરા ધેનુર્ધીરા ધૃતિર્ધ્રુવા ।
ધેનુદાનફલસ્પર્શા ધર્મકામાર્થમોક્ષદા ॥ ૯૧॥

ધર્મોર્મિવાહિની ધુર્યા ધાત્રી ધાત્રીવિભૂષણમ્ ।
ધર્મિણી ધર્મશીલા ચ ધન્વિકોટિકૃતાવના ॥ ૯૨॥

ધ્યાતૃપાપહરા ધ્યેયા ધાવની ધૂતકલ્મષા ।
ધર્મધારા ધર્મસારા ધનદા ધનવર્ધિની ॥ ૯૩॥

ધર્માધર્મગુણચ્છેત્રી ધત્તૂરકુસુમપ્રિયા ।
ધર્મેશી ધર્મશાસ્ત્રજ્ઞા ધનધાન્યસમૃદ્ધિકૃત્ ॥ ૯૪॥

ધર્મલભ્યા ધર્મજલા ધર્મપ્રસવધર્મિણી ।
ધ્યાનગમ્યસ્વરૂપા ચ ધરણી ધાતૃપૂજિતા ॥ ૯૫॥

ધૂર્ધૂર્જટિજટાસંસ્થા ધન્યા ધીર્ધારણાવતી ।
નન્દા નિર્વાણજનની નન્દિની નુન્નપાતકા ॥ ૯૬॥

નિષિદ્ધવિઘ્નનિચયા નિજાનન્દપ્રકાશિની ।
નભોઽઙ્ગણચરી નૂતિર્નમ્યા નારાયણી નુતા ॥ ૯૭॥

નિર્મલા નિર્મલાખ્યાના નાશિની તાપસમ્પદામ્ ।
નિયતા નિત્યસુખદા નાનાશ્ચર્યમહાનિધિઃ ॥ ૯૮॥

નદી નદસરોમાતા નાયિકા નાકદીર્ઘિકા ।
નષ્ટોદ્ધરણધીરા ચ નન્દના નન્દદાયિની ॥ ૯૯॥

નિર્ણિક્તાશેષભુવના નિઃસઙ્ગા નિરુપદ્રવા ।
નિરાલમ્બા નિષ્પ્રપઞ્ચા નિર્ણાશિતમહામલા ॥ ૧૦૦॥

નિર્મલજ્ઞાનજનની નિઃશેષપ્રાણિતાપહૃત્ ।
નિત્યોત્સવા નિત્યતૃપ્તા નમસ્કાર્યા નિરઞ્જના ॥ ૧૦૧॥

નિષ્ઠાવતી નિરાતઙ્કા નિર્લેપા નિશ્ચલાત્મિકા ।
નિરવદ્યા નિરીહા ચ નીલલોહિતમૂર્ધગા ॥ ૧૦૨॥

નન્દિભૃઙ્ગિગણસ્તુત્યા નાગા નન્દા નગાત્મજા ।

નિષ્પ્રત્યૂહા નાકનદી નિરયાર્ણવદીર્ઘનૌઃ ॥ ૧૦૩॥

પુણ્યપ્રદા પુણ્યગર્ભા પુણ્યા પુણ્યતરઙ્ગિણી ।
પૃથુઃ પૃથુફલા પૂર્ણા પ્રણતાર્તિપ્રભઞ્જની ॥ ૧૦૪॥

પ્રાણદા પ્રાણિજનની પ્રાણેશી પ્રાણરૂપિણી ।
પદ્માલયા પરાશક્તિઃ પુરજિત્પરમપ્રિયા ॥ ૧૦૫॥

પરા પરફલપ્રાપ્તિઃ પાવની ચ પયસ્વિની ।
પરાનન્દા પ્રકૃષ્ટાર્થા પ્રતિષ્ઠા પાલિની પરા ॥ ૧૦૬॥ var પાલની

પુરાણપઠિતા પ્રીતા પ્રણવાક્ષરરૂપિણી ।
પાર્વતી પ્રેમસમ્પન્ના પશુપાશવિમોચની ॥ ૧૦૭॥

પરમાત્મસ્વરૂપા ચ પરબ્રહ્મપ્રકાશિની ।
પરમાનન્દનિષ્યન્દા પ્રાયશ્ચિત્તસ્વરૂપિણી ॥ ૧૦૮॥ var નિષ્પન્દા

પાનીયરૂપનિર્વાણા પરિત્રાણપરાયણા ।
પાપેન્ધનદવજ્વાલા પાપારિઃ પાપનામનુત્ ॥ ૧૦૯॥

પરમૈશ્વર્યજનની પ્રજ્ઞા પ્રાજ્ઞા પરાપરા ।
પ્રત્યક્ષલક્ષ્મીઃ પદ્માક્ષી પરવ્યોમામૃતસ્રવા ॥ ૧૧૦॥

પ્રસન્નરૂપા પ્રણિધિઃ પૂતા પ્રત્યક્ષદેવતા ।
પિનાકિપરમપ્રીતા પરમેષ્ઠિકમણ્ડલુઃ ॥ ૧૧૧॥

પદ્મનાભપદાર્ઘ્યેણ પ્રસૂતા પદ્મમાલિની ।
પરર્દ્ધિદા પુષ્ટિકરી પથ્યા પૂર્તિઃ પ્રભાવતી ॥ ૧૧૨॥

પુનાના પીતગર્ભઘ્ની પાપપર્વતનાશિની ।
ફલિની ફલહસ્તા ચ ફુલ્લામ્બુજવિલોચના ॥ ૧૧૩॥

ફાલિતૈનોમહાક્ષેત્રા ફણિલોકવિભૂષણમ્ ।
ફેનચ્છલપ્રણુન્નૈનાઃ ફુલ્લકૈરવગન્ધિની ॥ ૧૧૪॥

ફેનિલાચ્છામ્બુધારાભા ફડુચ્ચાટિતપાતકા ।
ફાણિતસ્વાદુસલિલા ફાણ્ટપથ્યજલાવિલા ॥ ૧૧૫॥

વિશ્વમાતા ચ વિશ્વેશી વિશ્વા વિશ્વેશ્વરપ્રિયા ।
બ્રહ્મણ્યા બ્રહ્મકૃદ્ બ્રાહ્મી બ્રહ્મિષ્ઠા વિમલોદકા ॥ ૧૧૬॥

વિભાવરી ચ વિરજા વિક્રાન્તાનેકવિષ્ટપા ।
વિશ્વમિત્રં વિષ્ણુપદી વૈષ્ણવી વૈષ્ણવપ્રિયા ॥ ૧૧૭ ॥

વિરૂપાક્ષપ્રિયકરી વિભૂતિર્વિશ્વતોમુખી ।
વિપાશા વૈબુધી વેદ્યા વેદાક્ષરરસસ્રવા ॥ ૧૧૮ ॥

વિદ્યા વેગવતી વન્દ્યા બૃંહણી બ્રહ્મવાદિની ।
વરદા વિપ્રકૃષ્ટા ચ વરિષ્ઠા ચ વિશોધની ॥ ૧૧૯ ॥

વિદ્યાધરી વિશોકા ચ વયોવૃન્દનિષેવિતા ।
બહૂદકા બલવતી વ્યોમસ્થા વિબુધપ્રિયા ॥ ૧૨૦ ॥

વાણી વેદવતી વિત્તા બ્રહ્મવિદ્યાતરઙ્ગિણી ।
બ્રહ્માણ્ડકોટિવ્યાપ્તામ્બુર્બ્રહ્મહત્યાપહારિણી ॥ ૧૨૧ ॥

બ્રહ્મેશવિષ્ણુરૂપા ચ બુદ્ધિર્વિભવવર્ધિની ।
વિલાસિસુખદા વશ્યા વ્યાપિની ચ વૃષારણિઃ ॥ ૧૨૨ ॥

વૃષાઙ્કમૌલિનિલયા વિપન્નાર્તિપ્રભઞ્જની ।
વિનીતા વિનતા બ્રધ્નતનયા વિનયાન્વિતા ॥ ૧૨૩ ॥

વિપઞ્ચી વાદ્યકુશલા વેણુશ્રુતિવિચક્ષણા ।
વર્ચસ્કરી બલકરી બલોન્મૂલિતકલ્મષા ॥ ૧૨૪ ॥

વિપાપ્મા વિગતાતઙ્કા વિકલ્પપરિવર્જિતા ।
વૃષ્ટિકર્ત્રી વૃષ્ટિજલા વિધિર્વિચ્છિન્નબન્ધના ॥ ૧૨૫ ॥

વ્રતરૂપા વિત્તરૂપા બહુવિઘ્નવિનાશકૃત્ ।
વસુધારા વસુમતી વિચિત્રાઙ્ગી વિભાવસુઃ ॥ ૧૨૬ ॥

વિજયા વિશ્વબીજં ચ વામદેવી વરપ્રદા ।
વૃષાશ્રિતા વિષઘ્ની ચ વિજ્ઞાનોર્મ્યંશુમાલિની ॥ ૧૨૭ ॥

ભવ્યા ભોગવતી ભદ્રા ભવાની ભૂતભાવિની ।
ભૂતધાત્રી ભયહરા ભક્તદારિદ્ર્યઘાતિની ॥ ૧૨૮ ॥

ભુક્તિમુક્તિપ્રદા ભેશી ભક્તસ્વર્ગાપવર્ગદા ।
ભાગીરથી ભાનુમતી ભાગ્યં ભોગવતી ભૃતિઃ ॥ ૧૨૯ ॥

ભવપ્રિયા ભવદ્વેષ્ટ્રી ભૂતિદા ભૂતિભૂષણા ।
ભાલલોચનભાવજ્ઞા ભૂતભવ્યભવત્પ્રભુઃ ॥ ૧૩૦ ॥

ભ્રાન્તિજ્ઞાનપ્રશમની ભિન્નબ્રહ્માણ્ડમણ્ડપા ।
ભૂરિદા ભક્તસુલભા ભાગ્યવદ્દૃષ્ટિગોચરી ॥ ૧૩૧॥

ભઞ્જિતોપપ્લવકુલા ભક્ષ્યભોજ્યસુખપ્રદા ।
ભિક્ષણીયા ભિક્ષુમાતા ભાવા ભાવસ્વરૂપિણી ॥ ૧૩૨॥

મન્દાકિની મહાનન્દા માતા મુક્તિતરઙ્ગિણી ।
મહોદયા મધુમતી મહાપુણ્યા મુદાકરી ॥ ૧૩૩॥

મુનિસ્તુતા મોહહન્ત્રી મહાતીર્થા મધુસ્રવા ।
માધવી માનિની માન્યા મનોરથપથાતિગા ॥ ૧૩૪॥

મોક્ષદા મતિદા મુખ્યા મહાભાગ્યજનાશ્રિતા ।
મહાવેગવતી મેધ્યા મહા મહિમભૂષણા ॥ ૧૩૫॥

મહાપ્રભાવા મહતી મીનચઞ્ચલલોચના ।
મહાકારુણ્યસમ્પૂર્ણા મહર્દ્ધિશ્ચ મહોત્પલા ॥ ૧૩૬॥

મૂર્તિમન્મુક્તિરમણી મણિમાણિક્યભૂષણા ।
મુક્તાકલાપનેપથ્યા મનોનયનનન્દિની ॥ ૧૩૭॥

મહાપાતકરાશિઘ્ની મહાદેવાર્ધહારિણી ।
મહોર્મિમાલિની મુક્તા મહાદેવી મનોન્મની ॥ ૧૩૮॥

મહાપુણ્યોદયપ્રાપ્યા માયાતિમિરચન્દ્રિકા ।
મહાવિદ્યા મહામાયા મહામેધા મહૌષધમ્ ॥ ૧૩૯॥

માલાધરી મહોપાયા મહોરગવિભૂષણા ।
મહામોહપ્રશમની મહામઙ્ગલમઙ્ગલમ્ ॥ ૧૪૦॥

માર્તણ્ડમણ્ડલચરી મહાલક્ષ્મીર્મદોજ્ઝિતા ।
યશસ્વિની યશોદા ચ યોગ્યા યુક્તાત્મસેવિતા ॥ ૧૪૧॥

યોગસિદ્ધિપ્રદા યાજ્યા યજ્ઞેશપરિપૂરિતા ।
યજ્ઞેશી યજ્ઞફલદા યજનીયા યશસ્કરી ॥ ૧૪૨॥

યમિસેવ્યા યોગયોનિર્યોગિની યુક્તબુદ્ધિદા ।
યોગજ્ઞાનપ્રદા યુક્તા યમાદ્યષ્ટાઙ્ગયોગયુક્ ॥ ૧૪૩॥

યન્ત્રિતાઘૌઘસઞ્ચારા યમલોકનિવારિણી ।

યાતાયાતપ્રશમની યાતનાનામકૃન્તની ॥ ૧૪૪॥

યામિનીશહિમાચ્છોદા યુગધર્મવિવર્જિતા ।
રેવતી રતિકૃદ્ રમ્યા રત્નગર્ભા રમા રતિઃ ॥ ૧૪૫॥

રત્નાકરપ્રેમપાત્રં રસજ્ઞા રસરૂપિણી ।
રત્નપ્રાસાદગર્ભા ચ રમણીયતરઙ્ગિણી ॥ ૧૪૬॥

રત્નાર્ચી રુદ્રરમણી રાગદ્વેષવિનાશિની ।
રમા રામા રમ્યરૂપા રોગિજીવાનુરૂપિણી ॥ ૧૪૭॥

રુચિકૃદ્ રોચની રમ્યા રુચિરા રોગહારિણી ।
રાજહંસા રત્નવતી રાજત્કલ્લોલરાજિકા ॥ ૧૪૮॥

રામણીયકરેખા ચ રુજારી રોગરોષિણી । var રોગશોષિણી
રાકા રઙ્કાર્તિશમની રમ્યા રોલમ્બરાવિણી ॥ ૧૪૯॥

રાગિણી રઞ્જિતશિવા રૂપલાવણ્યશેવધિઃ ।
લોકપ્રસૂર્લોકવન્દ્યા લોલત્કલ્લોલમાલિની ॥ ૧૫૦॥

લીલાવતી લોકભૂમિર્લોકલોચનચન્દ્રિકા ।
લેખસ્રવન્તી લટભા લઘુવેગા લઘુત્વહૃત્ ॥ ૧૫૧॥

લાસ્યત્તરઙ્ગહસ્તા ચ લલિતા લયભઙ્ગિગા ।
લોકબન્ધુર્લોકધાત્રી લોકોત્તરગુણોર્જિતા ॥ ૧૫૨॥

લોકત્રયહિતા લોકા લક્ષ્મીર્લક્ષણલક્ષિતા ।
લીલા લક્ષિતનિર્વાણા લાવણ્યામૃતવર્ષિણી ॥ ૧૫૩॥

વૈશ્વાનરી વાસવેડ્યા વન્ધ્યત્વપરિહારિણી ।
વાસુદેવાઙ્ઘ્રિરેણુઘ્ની વજ્રિવજ્રનિવારિણી ॥ ૧૫૪॥

શુભાવતી શુભફલા શાન્તિઃ શન્તનુવલ્લભા । var શાન્તનુ
શૂલિની શૈશવવયાઃ શીતલામૃતવાહિની ॥ ૧૫૫॥

શોભાવતી શીલવતી શોષિતાશેષકિલ્બિષા ।
શરણ્યા શિવદા શિષ્ટા શરજન્મપ્રસૂઃશિવા ॥ ૧૫૬॥

શક્તિઃ શશાઙ્કવિમલા શમનસ્વસૃસમ્મતા ।
શમા શમનમાર્ગઘ્ની શિતિકણ્ઠમહાપ્રિયા ॥ ૧૫૭॥

શુચિઃ શુચિકરી શેષા શેષશાયિપદોદ્ભવા ।
શ્રીનિવાસશ્રુતિઃ શ્રદ્ધા શ્રીમતી શ્રીઃ શુભવ્રતા ॥ ૧૫૮॥

શુદ્ધવિદ્યા શુભાવર્તા શ્રુતાનન્દા શ્રુતિસ્તુતિઃ ।
શિવેતરઘ્ની શબરી શામ્બરીરૂપધારિણી ॥ ૧૫૯॥

શ્મશાનશોધની શાન્તા શશ્વચ્છતધૃતિસ્તુતા ।
શાલિની શાલિશોભાઢ્યા શિખિવાહનગર્ભભૃત્ ॥ ૧૬૦॥

શંસનીયચરિત્રા ચ શાતિતાશેષપાતકા ।
ષડ્ગુણૈશ્વર્યસમ્પન્ના ષડઙ્ગશ્રુતિરૂપિણી ॥ ૧૬૧॥

ષણ્ઢતાહારિસલિલા સ્ત્યાયન્નદનદીશતા ।
સરિદ્વારા ચ સુરસા સુપ્રભા સુરદીર્ઘિકા ॥ ૧૬૨॥

સ્વઃ સિન્ધુઃ સર્વદુઃખઘ્ની સર્વવ્યાધિમહૌષધમ્ ।
સેવ્યા સિદ્ધિઃ સતી સૂક્તિઃ સ્કન્દસૂશ્ચ સરસ્વતી ॥ ૧૬૩॥

સમ્પત્તરઙ્ગિણી સ્તુત્યા સ્થાણુમૌલિકૃતાલયા ।
સ્થૈર્યદા સુભગા સૌખ્યા સ્ત્રીષુ સૌભાગ્યદાયિની ॥ ૧૬૪॥

સ્વર્ગનિઃશ્રેણિકા સૂમા સ્વધા સ્વાહા સુધાજલા । var સૂક્ષ્મા
સમુદ્રરૂપિણી સ્વર્ગ્યા સર્વપાતકવૈરિણી ॥ ૧૬૫॥

સ્મૃતાઘહારિણી સીતા સંસારાબ્ધિતરણ્ડિકા ।
સૌભાગ્યસુન્દરી સન્ધ્યા સર્વસારસમન્વિતા ॥ ૧૬૬॥

હરપ્રિયા હૃષીકેશી હંસરૂપા હિરણ્મયી ।
હૃતાઘસઙ્ઘા હિતકૃદ્ધેલા હેલાઘગર્વહૃત્ ॥ ૧૬૭॥

ક્ષેમદા ક્ષાલિતાઘૌઘા ક્ષુદ્રવિદ્રાવિણી ક્ષમા ।

ગઙ્ગેતિ નામસાહસ્રં ગઙ્ગાયાઃ કલશોદ્ભવ । var ઇતિ નામસહસ્રં હિ
કીર્તયિત્વા નરઃ સમ્યગ્ગઙ્ગાસ્નાનફલં લભેત્ ॥ ૧૬૮॥

સર્વપાપપ્રશમનં સર્વવિઘ્નવિનાશનમ્ ।
સર્વસ્તોત્રજપાચ્છ્રેષ્ઠં સર્વપાવનપાવનમ્ ॥ ૧૬૯॥

શ્રદ્ધયાભીષ્ટફલદં ચતુર્વર્ગસમૃદ્ધિકૃત્ ।
સકૃજ્જપાદવાપ્નોતિ હ્યેકક્રતુફલં મુને ॥ ૧૭૦॥

સર્વતીર્થેષુ યઃ સ્નાતઃ સર્વયજ્ઞેષુ દીક્ષિતઃ ।
તસ્ય યત્ફલમુદ્દિષ્ટં ત્રિકાલપઠનાચ્ચ તત્ ॥ ૧૭૧॥

સર્વવ્રતેષુ યત્પુણ્યં સમ્યક્ચીર્ણેષુ વાડવ ।
તત્ફલં સમવાપ્નોતિ ત્રિસન્ધ્યં નિયતઃ પઠન્ ॥ ૧૭૨॥

સ્નાનકાલે પઠેદ્યસ્તુ યત્ર કુત્ર જલાશયે ।
તત્ર સન્નિહિતા નૂનં ગઙ્ગા ત્રિપથગા મુને ॥ ૧૭૩॥

શ્રેયોઽર્થી લભતે શ્રેયો ધનાર્થી લભતે ધનમ્ ।
કામી કામાનવાપ્નોતિ મોક્ષાર્થી મોક્ષમાપ્નુયાત્ ॥ ૧૭૪॥

વર્ષં ત્રિકાલપઠનાચ્છ્રદ્ધયા શુચિમાનસઃ ।
ઋતુકાલાભિગમનાદપુત્રઃ પુત્રવાન્ ભવેત્ ॥ ૧૭૫॥

નાકાલમરણં તસ્ય નાગ્નિચોરાહિસાધ્વસમ્ ।
નામ્નાં સહસ્રં ગઙ્ગાયા યો જપેચ્છ્રદ્ધયા મુને ॥ ૧૭૬॥

ગઙ્ગાનામસહસ્રં તુ જપ્ત્વા ગ્રામાન્તરં વ્રજેત્ ।
કાર્યસિદ્ધિમવાપ્નોતિ નિર્વિઘ્નો ગેહમાવિશેત્ ॥ ૧૭૭॥

તિથિવારર્ક્ષયોગાનાં ન દોષઃ પ્રભવેત્તદા ।
યદા જપ્ત્વા વ્રજેદેતત્ સ્તોત્રં ગ્રામાન્તરં નરઃ ॥ ૧૭૮॥

આયુરારોગ્યજનનં સર્વોપદ્રવનાશનમ્ ।
સર્વસિદ્ધિકરં પુંસાં ગઙ્ગાનામસહસ્રકમ્ ॥ ૧૭૯॥

જન્માન્તરસહસ્રેષુ યત્પાપં સમ્યગર્જિતમ્ ।
ગઙ્ગાનામસહસ્રસ્ય જપનાત્તત્ક્ષયં વ્રજેત્ ॥ ૧૮૦॥

બ્રહ્મઘ્નો મદ્યપઃ સ્વર્ણસ્તેયી ચ ગુરુતલ્પગઃ ।
તત્સંયોગી ભ્રૂણહન્તા માતૃહા પિતૃહા મુને ॥ ૧૮૧॥

વિશ્વાસઘાતી ગરદઃ કૃતઘ્નો મિત્રઘાતકઃ ।
અગ્નિદો ગોવધકરો ગુરુદ્રવ્યાપહારકઃ ॥ ૧૮૨॥

મહાપાતકયુક્તોઽપિ સંયુક્તોઽપ્યુપપાતકૈઃ ।
મુચ્યતે શ્રદ્ધયા જપ્ત્વા ગઙ્ગાનામસહસ્રકમ્ ॥ ૧૮૩॥

આધિવ્યાધિપરિક્ષિપ્તો ઘોરતાપપરિપ્લુતઃ ।
મુચ્યતે સર્વદુઃખેભ્યઃ સ્તવસ્યાસ્યાનુકીર્તનાત્ ॥ ૧૮૪॥

સંવત્સરેણ યુક્તાત્મા પઠન્ ભક્તિપરાયણઃ ।
અભીપ્સિતાં લભેત્સિદ્ધિં સર્વૈઃ પાપૈઃ પ્રમુચ્યતે ॥ ૧૮૫॥

સંશયાવિષ્ટચિત્તસ્ય ધર્મવિદ્વેષિણોઽપિ ચ ।
દામ્ભિકસ્યાપિ હિંસ્રસ્ય ચેતો ધર્મપરં ભવેત્ ॥ ૧૮૬॥

વર્ણાશ્રમપથીનસ્તુ કામક્રોધવિવર્જિતઃ ।
યત્ફલં લભતે જ્ઞાની તદાપ્નોત્યસ્ય કીર્તનાત્ ॥ ૧૮૭॥

ગાયત્ર્યયુતજપ્યેન યત્ફલં સમુપાર્જિતમ્ ।
સકૃત્પઠનતઃ સમ્યક્તદશેષમવાપ્નુયાત્ ॥ ૧૮૮॥

ગાં દત્ત્વા વેદવિદુષે યત્ફલં લભતે કૃતી ।
તત્પુણ્યં સમ્યગાખ્યાતં સ્તવરાજસકૃજ્જપાત્ ॥ ૧૮૯॥

ગુરુશુશ્રૂષણં કુર્વન્ યાવજ્જીવં નરોત્તમઃ ।
યત્પુણ્યમર્જયેત્તદ્ભાગ્વર્ષં ત્રિષવણં જપન્ ॥ ૧૯૦॥

વેદપારાયણાત્પુણ્યં યદત્ર પરિપઠ્યતે ।
તત્ષણ્માસેન લભતે ત્રિસન્ધ્યં પરિકીર્તનાત્ ॥ ૧૯૧॥

ગઙ્ગાયાઃ સ્તવરાજસ્ય પ્રત્યહં પરિશીલનાત્ ।
શિવભક્તિમવાપ્નોતિ વિષ્ણુભક્તોઽથવા ભવેત્ ॥ ૧૯૨॥

યઃ કીર્તયેદનુદિનં ગઙ્ગાનામસહસ્રકમ્ ।
તત્સમીપે સહચરી ગઙ્ગાદેવી સદા ભવેત્ ॥ ૧૯૩॥

સર્વત્ર પૂજ્યો ભવતિ સર્વત્ર વિજયી ભવેત્ ।
સર્વત્ર સુખમાપ્નોતિ જાહ્નવીસ્તોત્રપાઠતઃ ॥ ૧૯૪॥

સદાચારી સ વિજ્ઞેયઃ સ શુચિસ્તુ સદૈવ હિ ।
કૃતસર્વસુરાર્ચઃ સ કીર્તયેદ્ય ઇમાં સ્તુતિમ્ ॥ ૧૯૫॥

તસ્મિંસ્તૃપ્તે ભવેત્ તૃપ્તા જાહ્નવી નાત્ર સંશયઃ ।
તસ્માત્સર્વપ્રયત્નેન ગઙ્ગાભક્તં સમર્ચયેત્ ॥ ૧૯૬॥

સ્તવરાજમિમં ગાઙ્ગં શ‌ૃણુયાદ્યશ્ચ વૈ પઠેત્ ।
શ્રાવયેદથ તદ્ભક્તાન્ દમ્ભલોભવિવર્જિતઃ ॥ ૧૯૭॥

મુચ્યતે ત્રિવિધૈઃ પાપૈર્મનોવાક્કાયસમ્ભવૈઃ ।

ક્ષણાન્નિષ્પાપતામેતિ પિતૃણાં ચ પ્રિયો ભવેત્ ॥ ૧૯૮॥

સર્વદેવપ્રિયશ્ચાપિ સર્વર્ષિગણસમ્મતઃ ।
અન્તે વિમાનમારુહ્યં દિવ્યસ્ત્રીશતસંવૃતઃ ॥ ૧૯૯॥

દિવ્યાભરણસમ્પન્નો દિવ્યભોગસમન્વિતઃ ।
નન્દનાદિવને સ્વૈરં દેવવત્સ પ્રમોદતે ॥ ૨૦૦॥

ભુજ્યમાનેષુ વિપ્રેષુ શ્રાદ્ધકાલે વિશેષતઃ ।
જપન્નિદં મહાસ્તોત્રં પિતૃણાં તૃપ્તિકારકમ્ ॥ ૨૦૧॥

યાવન્તિ તત્ર સિક્થાનિ યાવન્તોઽમ્બુકણાઃ સ્થિતાઃ ।
તાવન્ત્યેવ હિ વર્ષાણિ મોદન્તે સ્વપિતામહાઃ ॥ ૨૦૨॥

યથા પ્રીણન્તિ પિતરો પ્રીણન્તિ ગઙ્ગાયાં પિણ્ડદાનતઃ ।
તથૈવ તૃપ્નુયુઃ શ્રાદ્ધે સ્તવસ્યાસ્યાનુસંશ્રવાત્ ॥ ૨૦૩॥

એતત્સ્તોત્રં ગૃહે યસ્ય લિખિતં પરિપૂજ્યતે ।
તત્ર પાપભયં નાસ્તિ શુચિ તદ્ભવનં સદા ॥ ૨૦૪॥

અગસ્તે કિં બહૂક્તેન શ઼ૃણુ મે નિશ્ચિતં વચઃ ।
સંશયો નાત્ર કર્તવ્યઃ સન્દેગ્ધરિ ફલં નહિ ॥ ૨૦૫॥

યાવન્તિ મર્ત્યે સ્તોત્રાણિ મન્ત્રજાલાન્યનેકશઃ ।
તાવન્તિ સ્તવરાજસ્ય ગાઙ્ગેયસ્ય સમાનિ ન ॥ ૨૦૬॥

યાવજ્જન્મ જપેદ્યસ્તુ નામ્નામેતત્સહસ્રકમ્ ।
સ કીકટેષ્વપિ મૃતો ન પુનર્ગર્ભમાવિશેત્ ॥ ૨૦૭॥

નિત્યં નિયમવાનેતદ્યો જપેત્સ્તોત્રમુત્તમમ્ ।
અન્યત્રાપિ વિપન્નઃ સ ગઙ્ગાતીરે મૃતો ભવેત્ ॥ ૨૦૮॥

એતત્સ્તોત્રવરં રમ્યં પુરા પ્રોક્તં પિનાકિના ।
વિષ્ણવે નિજભક્તાય મુક્તિબીજાક્ષરાસ્પદમ્ ॥ ૨૦૯॥

ગઙ્ગાસ્નાનપ્રતિનિધિઃ સ્તોત્રમેતન્મયેરિતમ્ ।
સિસ્નાસુર્જાહ્નવીં તસ્માદેતત્સ્તોત્રં જપેત્સુધીઃ ॥ ૨૧૦॥

॥ ઇતિ શ્રીસ્કન્દપુરાણે એકાશીતિસાહસ્ર્યાં
સંહિતાયાં ચતુર્થૈકાશીખણ્ડેપૂર્વાર્ધે
ગઙ્ગાસહસ્રનામકથનં નામૈકોનત્રિંશત્તમોઽધ્યાયઃ ॥

સિતમકરનિષણ્ણાં શુભ્રવર્ણાં ત્રિનેત્રાં
   કરધૃતકલશોદ્યત્સોપલાભીત્યભીષ્ટામ્ ।
વિધિહરિરૂપાં સેન્દુકોટીરજૂટાં
   કલિતસિતદુકૂલાં જાહ્નવી તાં નમામિ ॥

Encoded and proofread by DPD, Kirk Wortman

*Shri Gangasahasranama Stotram*
pdf was typeset on January 22, 2022

Please send corrections to *sanskrit@cheerful.com*